अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-203**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2018**
**बी. ए. व्याकरणम् (सत्रम् : द्वितीयम्)**
**संस्कृतम्**
**तृतीयपत्रम्-संस्कृतसाहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 75**

**अवधेयम् :** इदं प्रश्नपत्रं पञ्चसप्ततेः (७५) अङ्कानां विद्यते। अत्र खण्डत्रयं वर्त्तते। प्रत्येकं खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

**खण्डः क**
**(दीर्घोत्तरीयप्रश्नाः)**

**निर्देशः–** 'क' खण्डे विकल्पसहिताः पञ्चप्रश्नाः प्रदत्ताः सन्ति, प्रत्येकं प्रश्नाय नवाङ्काः निधारिताः वर्तन्ते। **(5X9=45)**

**प्रश्नः1– अधोलिखितेषु गद्येषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या कुरुत –** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)–** अपरिणामोपशमो दारूणो लक्ष्मीमदः। कष्टमनञ्जनवतिसाध्यमैश्वर्यतिमिरान्धत्वम्। सततममूलमन्त्रगम्यो विषमो विषयविषास्वादमोहः। नित्यमस्नानशौच्यवध्यो रागमलावलेयः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति विस्तरेणाभिधीयसे।

**(ख)–** गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला, दिवसकरगतिरिव प्रकटितविविधसंक्रान्तिः, पातालगुहेव तमोबहुला, हिडिम्बेव भीमसाहसैकहार्यहृदया, प्रावृडिवाचिरद्युतिकारिणी, दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनं गुणवन्तमपवित्रमिव न स्पृशति।

**(ग)–** कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते, जातुषाभरणानीव सोष्माणं न सहन्ते, दुष्टवारणा इव महामानस्तम्भनिश्चलीकृता न गृह्णन्त्युपदेशम, तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति, इषव इव पानवर्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति।

**प्रश्नः2– निम्नलिखितेषु पद्येषु कयोश्चिद् द्वयोः सप्रसङ्गं व्याख्या विधेया–** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)–** ज्वलनार्कप्रतीकाशमधृष्यं पर्वतोपमम्।
वृक्षमाश्रित्य तिष्ठन्तं ददर्श भरतर्षभः।।

**(ख)–** इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव।
भयं वै मानुषो भावः परित्यागोऽसतामिव।।

**(ग)–** अज्ञानेनावृतो लोकस्तमसा न प्रकाशते।
लोभात् त्यजति मित्राणि संगात् स्वर्गं न गच्छति।।

**प्रश्नः3– निम्नलिखितेषु पद्येषु कयोश्चिद्द्वयोः सप्रसङ्गं व्याख्या कुरुत–** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)–** माल्यैर्ध्वजाग्रपतितैः कृतमुण्डमालं
लग्नैकसायकवरं रथिनं विपन्नम्।
जामातरं प्रवहणादिव बन्धुनार्यो
हृष्टाः शिवा रथमुखादवतारयन्ति।।

**(ख)**– भीमां गदां क्षियति गर्जति वल्गमानः
शीघ्रं भुजं हरति तस्य कृतं भिनत्ति।
चारीं गतिं प्रचरति प्रहरत्यभीक्ष्णं
शिक्षान्वितो नरपतिर्बलवांस्तु भीमः।।

**(ग)**– वीर्याकरः सुतशतप्रविभक्तचक्षु –
दर्पोद्यतः कनयूपविलम्बबाहुः।
सृष्टो ध्रुवं त्रिदिवरक्षणजातशङ्कै –
र्दैवैररातितिमिराञ्जलिताडिताक्षः।।

**प्रश्नः4– अधःप्रदत्तेषु प्रश्नेषु कावपि द्वौ प्रश्नौ साधनीयौ –** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)**– अविवक्षितवाच्यस्य ध्वनेः स्वरूपं सादाहरणं विमृशत।

**(ख)**– करुणरसस्य स्वरूपं सोदाहरणं लिखत।

**(ग)**– किन्नाम गुणीभूतव्यङ्ग्यं काव्यमिति सोदाहरणं लिखत।

**प्रश्नः5– अधोलिखितेषु कयोरपि द्वयोरंशयोर्यथायथं व्याख्यानं कुरुत –** **($4\frac{1}{2}+4\frac{1}{2}$=09)**

**(क)**– तत्रानुमानगम्यानां पञ्चमहाभूतविकारसमुदायात्मकानामपि सतामिन्द्रियाणां तेजश्चक्षुषि, खं श्रोत्रे, घ्राणे क्षितिः, आपो रसने, स्पर्शनेऽनिलो विशेषेणोपपद्यते तत्र यद्यदात्मकमिन्द्रियं विशेषात्तत्तदात्मकमेवार्थमनुगृह्णति, तत्स्वभावाद् विभुत्वाच्च।

**(ख)**– देवगोब्राह्मणगुरुवृद्धसिद्धाचार्यानर्चयेत्, अग्निमुपचरेत्, ओषधीः प्रशस्ता धारयेत्, द्वौ कालावुपस्पृशेत् मलायनेष्वभीक्ष्णं पादयोर्वैमल्यमादध्यात्, त्रि पक्षस्य केशश्मश्रुनरवान् संहारयेत्।

**(ग)**– न विद्युत्स्वनार्तवीषु, नाभ्युदितासु दिक्षु, नाग्निसंप्लवे, न भूमिकम्पे, न महोत्सवे, नोल्कापाते, न महाग्रहोपगमने, न चन्द्रनष्टायां तिथौ, न सन्ध्ययोर्नामुरवाद्गुरोर्नावपतितं नातिमात्रं न तान्तं न विस्वरं नानवस्थितपदं नातिद्रुतं नातिविलम्बितं नात्युच्चैर्नातिचीचैः स्वरैरध्ययनमभ्यसेत्।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः**– 'ख' खण्डे विकल्पसहिताः पञ्चप्रश्नाः प्रदत्ताः सन्ति, प्रत्येकं प्रश्नाय पञ्चाङ्काः निर्धारिताः वर्तन्ते। केवलं पञ्च एव प्रश्नाः समाधेयाः। **(5X5=25)**

**प्रश्नः1**– शुकनासोपदेशानुसारं लक्ष्म्याः स्वरूपं लिखत।

***अथवा***

बाणभट्टस्य गद्यवैशिष्ट्यं प्रतिपादयत।

**प्रश्नः2**– यक्षयुधिष्ठिरसंवादस्य सारो लेखनीयः।

***अथवा***

अधोलिखितेषु शब्देषु व्याकरणात्मिकाः टिप्पण्यो लेखनीयाः–
तीक्ष्णास्थिभेदिनः। अभिवीक्ष्य। भ्रातृशोकाभिसंतप्तः। आमुक्तखड्गः। व्यपेतजलनिर्घोषम्।

**प्रश्नः3**– दुर्योधनस्य चरित्रचित्रणं कुरुत।

***अथवा***

भासस्य नाट्यकलाविषये लघु निबन्धे लेखनीयः।

**प्रश्नः4**– यत्र व्यङ्ग्यप्रतीतेस्तु क्रमःसम्यग् विभाष्यते।
स संलक्ष्यक्रमव्यङ्ग्यस्तद्भेदा बहवः स्मृताः।।
इति कारिकाया व्याख्यां कुरुत।

***अथवा***

के स्थायिभावाः? तेषां संक्षिप्तःपरिचयो देयः।

**प्रश्नः5**– किन्नाम पञ्चपञ्चकं प्रोक्तं चरकसंहितायाम् संक्षेपेण विमृशत।

***अथवा***

सद्वृत्तवर्णनविषये लघुर्लेखो लेखनीयः।

## खण्डः – "ग"

## (वस्तुनिष्ठप्रश्नाः)

**निर्देशः**– 'ग' खण्डे दश (10) वस्तुनिष्ठप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकं प्रश्नाय अर्धाङ्कः निर्धारितः वर्तते। सर्वे प्रश्नाः अनिवार्याः सन्ति। **(10X0.5=05)**

1. अक्षपावसानबोधा" अत्र कः समासः?
   (अ) तत्पुरुषः (ब) नञ् बहुव्रीहिः
   (स) अव्ययीभाव (द) द्वन्द्वः
2. "पुरुषोत्तमरतापि खलजनप्रिया" अत्र को नामालङ्कारः?
   (अ) उपमा (ब) विरोधः
   (स) उत्प्रेक्षा (द) रूपक
3. किमर्थं ब्राह्मणे दानम् प्रोक्तम्?
   (अ) ज्ञानार्थम् (ब) धर्मार्थम्
   (स) कर्मार्थम् (द) भोगार्थम्
4. किं स्थैर्यं ऋषिभिः प्रोक्तम्?
   (अ) स्वधर्मे स्थिरता (ब) अकर्मण्यता
   (स) स्वाध्यायः (द) तपः
5. उरुभङ्गस्याधारग्रन्थः कः?
   (अ) महाभारतम् (ब) रामायणम्
   (स) गीता (द) भागवतम्
6. मालवी का आसीत्?
   (अ) बलरामस्य भार्या (ब) श्रीकृष्णस्य भार्या
   (स) दुर्योधनस्य भार्या (द) भीमस्य भार्या
7. "त्वामस्मि वच्मि विदुषाम्" इत्यादि श्लोकः कस्य ध्वनेरूदाहरणम्?
   (अ) अत्यन्ततिरस्कृतवाच्यस्य (ब) संलक्ष्यक्रमव्यङ्ग्यस्य
   (स) अर्थान्तरसंक्रमितवाच्यस्य (द) असंलक्ष्यक्रमण्यङ्ग्य
8. विभावस्य कति भेदाः?
   (अ) चत्वारि (ब) त्रयः
   (स) पञ्च (द) द्वौ
9. इन्द्रियार्थाः कति प्रोक्ता?
   (अ) चत्वारः (ब) त्रयः
   (स) षट् (द) पञ्च
10. कर्म किमाश्रितं प्रोक्तं चरकसंहितायाम्?
    (अ) धर्माश्रितम् (ब) गुणाश्रितम्
    (स) भोगाश्रितम् (द) द्रव्याश्रितम्

--------------x--------------